# परिशिष्टम् -१

महोपाध्याय - श्रीविनयसागर- विरचितः

॥ विद्वच्चिन्तामणिः ॥

श्री सरस्वत्यै नमः ॥

श्रीमद्‌वागीश्वरीवक्त्रान्मूलसूत्रमवाप्य हि।
कृतं सारस्वतं येन ततोऽनुभूतये नमः ॥ १ ॥

अ इ उ ऋ लु समानाः सूत्रमष्टाक्षरं परम्।
ह्रस्वदीर्घप्लुतभेदाः सवर्णा हि परस्परम्॥ २ ॥

ए ऐ ओ औ सन्ध्यक्षरा - ण्यत्रोभये स्वरा अथ।
अवर्जा नामिनो ह य वरादी सान्तमित्यथ॥ ३ ॥

आद्यन्ताभ्यां च सूत्राणि संज्ञायाः सप्त सन्ति च। ०७
इ यं स्वर उ वमृ रम् लृ लमे अय् ततःपरम् ॥ ४ ॥

ए आय् ओ अव् औ आव् य्वोर्लो - पश् वा पदान्त एव च।
एदोतोऽतो ङस्य सव-र्णे दीर्घः सह चा इ ए ॥ ५ ॥

उ ओ ऋ अर् लृ अल् ए ऐ ऐ ओ औ औ ततोऽस्ति च।
ओष्ठोत्वोर्वौ स्वरसन्धेः सूत्राण्येकोनविंशतिः॥ ६ ॥ १९

नामी अथ च य्वे द्वित्वे औ निपातः प्लुतः पुनः।
प्रकृतिभावस्य चत्वारि स्युश्च चपा अबे जषाः॥ ७ ॥ ०४

ततो ञमे ञमा वा च - पाच्छ शो हो झभास्तथा।
स्तोः श्चुभिःश्चुर्नशाच्चेष्टु - भिः ष्टुश्च तोर्लि लो न षि॥ ८ ॥

टोरन्त्यात् त्र्यक्षरं सूत्रं सस्वरं च न सक् छते।
भवेत्तथैव शे चग्वा ङ्ण्नोः ह्रस्वाद् द्विःस्वरे पुनः॥ ९ ॥

छश्च हसेऽर्हहसो मोऽनुस्वारश्च चतुरक्षरम्।
नश्चापदान्ते झसे स्यात् यमा यपेऽस्य वा त्वथ॥ १० ॥

इति व्यञ्जनसन्धेश्च सूत्राण्यष्टाधिका दश। १८
सप्ताक्षरं तु विसर्ज - नीयस्य सो भवदेथ॥ ११ ॥

कुप्वोः꒳क꒳पौ वा त्वतोऽत्यु-स्त्रिपदं द्वयक्षरं हबे।
आदबे लोपश् भोसश्च नामिनो रो र एककम्॥ १२ ॥

भवेद् रिलोपो दीर्धश्च सैषाद्धसे दशैव हि। १०
सन्धौ सूत्राणि पूर्णानि ह्यष्टपञ्चाशदेव हि॥ १३ ॥

अथाऽविभक्ति नाम स्यात् तस्मात् सिऔजसादय :।
समानाद्धेर्लोपोऽधातोरम्शसोरस्य पञ्च च॥ १४ ॥

सो नः पुंसो नुडामः स्याद् र सङ्ख्याया ष्ण एककम्।
त्रेरयङ् ड्णो जस्शसोर्लुक् अष्टनो डौ च आऽऽसु च॥ १५ ॥

रैस्भि चाद्दि तथा भ्यः स्याद् एस्बि भहुत्व ओसि च।
ङसिरत् ङस्स्य एवं टे - न ङे अक् द्विपदं त्वदः॥ १६ ॥

(आर्या) सर्वादेः स्मडतो ङि स्मिंश्च जसी स्यात् सुडाम आयश्च।
तदनु यटोश्च हसेपः सेलोपश्चाप इत्यपरम्॥ १७ ॥

टौसोरे धिरि रौ स्यान्डितां यडाम्ङे यतः पृथक्।
नियश्च स्त्रियां य्योर्धो ह्रस्वो ङितामट् वेयुवः॥ १८ ॥

इदुद्भ्यामौयु टा नाऽस्त्रि - यामथै ओ जसीति च।
धौ ङित्यथ च ङेरामित् त्रिपदं स्याद् ऋतो ङ उः॥ १९ ॥

सेरा धेरर् तथा डौ च पञ्च स्वरक्षरं स्तुरार्।
पुंसोऽसुङ् च व्रितो नुम् च वादीपोः शतुरेव च॥ २० ॥

भवेदप्ययोरान्नित्यम् इदं सूत्रं षडक्षरम्।
त्रिपदं च न्सम्महतोऽधौ दीर्धः शौ च चान्तकम्॥ २१ ॥

नोपधायास्तदन्वस्त्य-त्वसोः सौ शसि नामि च।
एकाक्षरमिनां शौ सावस्मिन् सूत्रे पदत्रयी॥ २२ ॥

अल्लोपः स्वरेऽम्वयुक्ता - च्छसादौ तु चतुः पदम्।
वेङ्योरञ्चेर्दीर्घश्च स्यात् तिरश्चादय एककम्॥ २३ ॥

चतुःपदं ष्ठुर्नोणोऽन्तेऽवकुप्वन्तरेऽपि च।
क्लिात्षः सः कृतस्येतत् सप्ताक्षरं चतुःपदम्॥ २४ ॥

स्यात् प्रादेश्च तथा तौ सुनमां नपुंसकात् स्यमोः।
लुगधातोम् च श्त्वन्यादेरीमौ स्यात् द्विपदं त्विदम्॥ २५ ॥

जश्शसोः शिर्नुमयमो द्विपदं नामिनः स्वरे।
स्यादद्यास्थ्नां शसादौ च चतुःपदं वसोर्व उम्॥ २६ ॥

(आर्या) श्वादेरातो धातोर्लोपस्त्रिपदमेव च पथां टेः।
हीतोत्पञ्चसु थो नुट् आ सौ दिव औ भवेदु रसे॥ २७ ॥

चतुराम् शौ चौरो वाम्शसि पुनरै सख्युरेव सेर्डाऽधेः।
चोशनसां तदनु य्वो - र्धातोरियुवौ स्वरेऽष्टवर्ण च॥ २८ ॥ (युग्मम्)

स्यात् स्त्रीभ्रुवोरथ य्वौ वा नुधातो स्त्रधिकं शतम् । १०३
विभक्तिसत्कसूत्राणि स्वरूपं युष्मदस्मदोः ॥ २९ ॥

प्राक् युष्मदस्मदोः षष्ठीचतुर्थ्यादि न सत्तकम् ।
एकविंशाक्षरं त्वा मा मा नादौ चादिभिश्च वै ॥ ३० ॥

त्वन्मदेकत्वे युवावौ द्विवचने पदं द्विकम् ।
तत आमौ च त्वमहं सिना यूयवयं जसा ॥ ३१ ॥

तुभ्यंमह्यं ङया तव -मम ङसा ङसिभ्यसोः ।
श्तुर्भ्यस् श्भ्यमथ सामाकम् भवेदाम्स्भौ द्विकं पदम् ॥ ३२ ॥

ए टाङ्योः सखिपत्योरीक् ङे अक् ङे द्व्यक्षरं त्विदम् ।
त्रिचतुरो : स्त्रियां तिसृ - चतसृवच्च काप्यतः ॥ ३३ ॥

ह्रस्वो वाऽन्यार्थ एकपदं गोर्नपुंसकस्य च ।
त्यदादेष्टेरः स्यादौ च दस्य मः सौ स एव तः ॥ ३४ ॥

भवेदिदमोऽयं पुंसि चेयं स्त्रियां स्त एव हि ।
अन टौसोस्तथा भिस् भिस् अदसः पदमेककम् ॥ ३५ ॥

सेरौ मादू भवेदेरी बहुत्वे भि दपां ततः ।
वसां रसे पुनश्चोः कुर्दिशाम् षो डः पदं द्विकम् ॥ ३६ ॥

नाम्नो नो लोपशधौ सं-योगान्तस्यैककं पदम् ।
स्कोराद्योश्च स्रोविसर्गः सस्तावड्णश्च द्व्यक्षरम् ॥ ३७ ॥

ओडीतिः (?) हि पदान्ते च तु रो रात्रिषु दोषामथ च धातोश्च ।
झस एव च नशे हो ढो दादेर्घो नहो ध इत्यपि च ॥ ३८ ॥

भवेच्छशसराजादेः षः षढोः कस्स एव च ।
सस्तोनपि दिपि स्याच्च सिपि वा दः स इत्यपि ॥ ३९ ॥

खसे चपा झसानां स्यात् त्रिपदं च झबे जबा : ।
वावसाने इदं सूत्रं द्विपदं चतुरक्षरम् ॥ ४० ॥

आदिजबानां झभान्तस्य झभाः स्ध्वोश्च चतुःपदम् ।
तथोर्धोऽधोऽव्ययाद्विभ - क्तेर्लुग्वाऽस्मिन् पदत्रयम् ॥ ४१ ॥

एकपदं समास - प्रत्यययोः स्यादलुक् क्वचित् ।
भवेदथाऽव्ययीभावादतोमनत एव तत् ॥ ४२ ॥

पञ्चाक्षरं च वा टाङ्योर्द्विपदं स नपुंसकम् ।
एकत्वे द्विगुद्वंद्वौ च सूत्राणि युष्मदस्मदी ॥ ४३ ॥

षट्सप्ततिश्च वर्तन्ते लिङ्गार्थे प्रथमा मता । ७६
आमन्त्रणे ततः सिर्धि-द्विपदं भो भगो अधोस् ॥ ४४ ॥

शेषाः कार्ये इतीदं यद् अष्टाविशंतिरक्षरम् ।
विना सहेति सूत्रं यत् तच्च सप्तदशाक्षरम् ॥ ४५ ॥

(आर्या) कर्तुकारणयोरक्ता-दौ कृति षष्ठी चतुःपदं सूत्रम् ।
अन्योक्ते प्रथमा स्युः कारकसूत्राणि चाऽष्टौ हि ॥ ४६ ॥ ०८

अपत्येऽण् अत इञनृ-षेर्ण्यायनणित्यदः ।
अष्टादशाक्षरं सूत्रं लुग्बहुत्वे क्वचित्ततः ॥ ४७ ॥

देवतेदमर्थे चाऽथ णितो वा द्विपदं ह्यदः ।
स्यात् कारकात् क्रियायुक्ते ततः केनेयका अथ ॥ ४८ ॥

भवेत् स्वार्थेऽपि वत्तुल्ये भावे तत्वयणः परम् .
अस्त्यर्थे मतुर्मान्तो - पधाद्वत्विनौ द्विकं पदम् ॥ ४९ ॥

तरतमेयस्विष्ठाः प्र-कर्षे वोव्यस्वरे ततः ।
यस्य लोपो भवेदीपि डिति टेर्द्विपदं त्विदम् ॥ ५० ॥

स्यान्नोवाऽन्त्यस्वरादिष्टिः कार्यायेच्च पदं द्विकम् ।
तथादिस्वरस्य ञ्णिति वृद्धिस्ततः क्वचिद्द्वयोः ॥ ५१ ॥

भवेन्नसन्धिर्य्वोर्युट् च धातोर्नामिन एव च ।
ततोऽत उपधाया आ-तो युक् हनो घदेव च ॥ ५२ ॥

त्रिपंद स्यात् हनो घ्ने च रातो ञौ पुक् तथा मिताम् ।
ह्रस्व आरै औ वृद्धिः स्याद् अरेदो नामिनो गुणः ॥ ५३ ॥

त्रयस्त्रिंशच्च सूत्राणि तद्धितस्याबतः स्त्रियाम् ।
न्रण ईप् च ष्ट्व्रितः स्यान्न - दादेर्जातेरयोपधात् ॥ ५४ ॥

स्वाङ्गाद्वा द्विपदं सूत्रं पुशंब्कावत् पदमेककम् ।
त्रिपदं ह्यौ च मन्वादेः पत्न्यादयश्च वोर्गुणात् ॥ ५५ ॥

ऊत ऊङ् च समाप्तानि सूत्राण्येकादश स्त्रियः । ११
समासश्चान्वये नाम्नां समाहारेऽत ईप् द्विगुः ॥ ५६ ॥

पूर्वेऽव्ययेऽव्ययीभावोऽ - मादौ तत्पुरुषो नञि ।
चाऽर्थे द्वन्द्वो बहूव्रीहि - रन्यार्थे-कर्मधारयः ॥ ५७ ॥

तुल्यार्थे टाडका पुंव - द्वाऽनेकस्वरमन्स्वरे ।
सहादेः सादिरेव प्रा - देरुपसर्ग इत्यपि ॥ ५८ ॥

प्राग्धातोः कृतासमासो नाम्नश्च पदमेककम् ।
चादिर्निपातस्तत्रादि - र्विभक्त्यर्थे द्विकं पदम् ।। ५९ ।।

स्यात् सद्य आदिःकाले त-दव्ययं चैकविंशति : । २१/३१०
स्युः समासस्य सूत्राणि प्रथमवृतिरित्यथ ।। ६० ।।

धातोश्च वर्तमाने तिप्-तस् अन्त्यादिमहेपरम् ।
यावत् सस्वरवर्णाः स्युरष्टाविंशतिरेव च ।। ६१ ।।

विधिसम्भावनयोर्यात् - यातामादीमहीति च ।
सस्वराण्यक्षराणि स्यु - स्त्रिचत्वारिंशदेव च ।। ६२ ।।

आशीः प्रेरणयोस्तुप्ताम् - अन्वित्याधामहैस्त्विह ।
पञ्चत्रिंशदक्षराणि सस्वराणि ततोऽप्यथ ।। ६३ ।।

अनद्यतनेऽतीते दिप् - तामन् - सिबिति चाऽऽमहि ।
एकत्रिंशदक्षराणि वर्तन्ते सस्वराणि च ।। ६४ ।।

परोक्षे णबतुसादि - महेयावच्च सस्वराः ।
अष्टाविंशति वर्णाः स्यु-र्द्विश्च ह्याशिषि यादिति - ।। ६५ ।।

सीमह्यस्यैकचत्वारिं - शदक्षराणि सन्ति च ।
सस्वराणि श्वस्तने ता - तारावादि च तास्महे - ।। ६६ ।।

यावदस्मिंश्च वर्णाः स्युश्चत्वारिंशच्च सस्वराः ।
यक् चर्तुषु तथाऽप्कर्त-र्यदादेर्लुक् पदं द्विकम् ।। ६७ ।।

अदो दिस्योर्ह्वादेद्विश्च दिवादेर्यो द्विकं पदम् ।
स्वादेर्नुश्च रुधादेर्नम् तनादेरुप् पदद्वयम् ।। ६८ ।।

तुदादेरोऽ पितदच्च ना क्र्यादेर्द्विपदं ह्यदः ।
स्याद्धसादान हौ त्यादौ भविष्यति स्यबेव च ॥ ६९ ॥

दिबादावट् स्वरादेश्च स्यप् क्रियातिक्रमे पुनः ।
स्याद् भूते सिस्ततो णित्पे - निटो नामिवतोऽपि च ॥ ७० ॥

द्विपदं हशषान्तात् सक् त्रेरङ् द्विश्च चतुः पदम् ।
भवेल्लित्पुषादेर्ङ इरितो वेण्तन्यकर्तरि ॥ ७१ ॥

लोपो दिस्योर्हसादस्ते - रीट् सेरदाद एव च ।
लोपो ह्रस्वाज्झसे चेटि झसाद् दादेः प इत्यपि ॥ ७२ ॥

स्यान्मेटस्तत और्वा हे - तो द्व्यक्षरमदेऽपि च ।
व्मोरा द्विपदमादाथ ई यात्येकं च यामियम् ॥ ७३ ॥

पुंस इडोर्वमोर्वा लो - पः कृञो ये च ङित्यदुः ।
नातःस्यादी हसे द्वेस्तो नमसोऽस्य सि सः पुनः ॥ ७४ ॥

आतोऽन्तोदनतो द्वेश्चाऽ-न उस् स्याविद एव वै ।
आतो णप् डौ झसाद्धि-है-र्होरित्येकाक्षरं परम् ॥ ७५ ॥

नव परस्मैपदानि पराण्यात्मन इत्यथ ।
नाम्नि च युष्मदि चास्म-दि च भागैस्तथाऽऽद्भुरि ॥ ७६ ॥

कर्मणि, कर्तरिपञ्चाऽऽ-दनुदात्तङ्तिस्ततः।
भवेच्च निविशादेर्ञित्-स्वरितेत उभे पुनः॥ ७७ ॥

परतोऽन्यदपित्तादि-ङिण्णादिः कित पदं द्विकम्।
ऋसंयागान्न क्त्वा सेड रुदां क्तो वा द्विकं पदम्॥ ७८ ॥

अतिशये हसादेर्यःङ् द्विश्च पञ्चपदं त्वदः।
इच्छायामात्मनः सश्च गुभ्य आयो द्विवर्णकम्॥ ७९ ॥ (युग्मम्)

भवेन्नाम्नो य ईचास्य सूत्रं पञ्चपदं त्विदम्।
आचार उपमानाच्च कर्तुर्यङ् च पदं द्विकम्॥ ८० ॥

ञिर्डित्करण एतस्मिन् सूत्रे स्याच्च पदं त्रिकम्।
धातोः प्रेरण इत्यस्य सूत्रस्य च पदद्वयम्॥ ८१ ॥

एकपदं चुरादेश्च स धातुर्भ्वादिरेव च।
से दीर्घो य्वेर्विहसे ये दादेरिश्च पदद्वयम्॥ ८२ ॥

सस्वरआदिर्द्विरद्विः स्वरादेः पर इत्यपि।
पूर्वस्य हसादिः शेषः शसात् खपा द्विकं पदम्॥ ८३ ॥

कुहोश्चुः स्थाज्झपानां ज-बचपा एककं च रः।
ह्रस्वो यः सेऽक्षरे द्वे च भृञां लुकि निजां गुणः॥ ८४ ॥

यङि चाऽऽतो ञमजपां नुक् रीगृदुपधस्य च।
अङिलधौ ह्रस्व उप धाया अस्य चतुःपदम्॥ ८५ ॥

लधो दीर्घो न रितः स्याद् आभ्वोर्णादौ पदद्वयम्।
नुगशां च लोपः पचां कित्ये चाऽस्य पदानि षट्॥ ८६ ॥

दां हौ इस्से च जह्योधि - शाधिः स्याद् द्व्यक्षरं गुणः।
नूपः शीङ उपधाया लधोर्नानिटि से ततः॥ ८७ ॥

सिस्योः ङ्कित्यद्वयुसि नो लोपो नमो गमां स्वरे।
आतोऽनपि यतो ञे - र्य्योरस्मिंश्च पदद्वयम्॥ ८८ ॥

असादेर्भ्वादिः सन्ध्यक्ष-राणिामेदं षऽक्षरम्।
आदेः ष्णः स्नः इदं सूत्रं त्रिपदं चतुरक्षरम्॥ ८९ ॥

विदो नवानां त्यादीनां णादि चैकादशाक्षरम्।
ब्रुव आहश्च पञ्चानां तथेस्मिंच पदद्वयम्॥ ९० ॥

आबादावीप् पितितितिस्मि द्वा यङ्लुकि ह्युरौ गमाम्।
छश्च दृशादेः पश्यादि - र्ज्ञाजनोर्जा पदद्वयम्॥ ९१ ॥

प्वादेर्हस्वो मुचादेर्मुम् खितिपदस्य चेदितः।
शमां दीर्घो ञमस्य क्त्वि-ति झसे त्रिपदं त्विदम्॥ ९२ ॥

लोपस्त्वनुदात्ततनाम् ऋत इर् पोरुरेव च।
सिसतासीस्यपामिट् चाऽ-स्मिंश्च सूत्रे पदद्वयम्॥ ९३ ॥

रुदादेश्चतुर्णा ह्वसा-देः कृतो हनृतः स्यपः।
उदितो वोदितश्चैकं पदं क्तिरेकवर्णम्॥ ९४ ॥

नैकस्वरादनुदात्ताद् वुः से पदं द्विकं कितः।
आदीदितो हबत्योश्च क्रादेर्णादेः पदं द्विकम्॥ ९५ ॥

कासादिप्रत्ययादाम् क्रस्-भूपरोऽस्य पदत्रयम्
पदं द्विकं भुवो वुक् स्याद् ईटो ग्रहां द्विकं पदम्॥ ९६ ॥

नामिनोऽचतुर्णां धो ढ आख्यातस्य भवन्ति च।
सम्पूर्णानि च सूत्राणि हयष्टसप्ततिसंहितम् ।। ९७ ।। ७८

कृत्कर्तरि तृवुणौ च नाम्युपधात् क एव च।
पचिनन्दिग्रहादेर - युणिन्येकादशाक्षरम् ।। ९८ ।।

दृशादेः शो ज्वलादेर्णः कार्येऽणस्य पदद्वयम्।
आतो डो नाम्नि चाटाव - थेखः ख्येजां खशेव वै ।। ९९ ।।

ख्युट् करणे भजां विण् च द्वे सूत्रे द्विपदे अमू।
आतो मनिप्क्वनिप्वनि - प : क्विप् दृशस्ततो दृशेः ।। १०० ।।

टक्सकौ चोपमाने का-र्येऽस्मिन् पञ्च पदानि च।
आ सार्वदेः किमिदमः कीश् सूत्रं द्विपदं ह्यदः ।। १०१ ।।

अदसोऽमू णिनिश्चैक-पदमतीत एव च।
क्विब्वनिब्डाः पदं चैकं तथा क्तक्तवतू भवेत् ।। १०२ ।।

क्वसुक्वानौ णबेवच्च सप्ताक्षरं पदं द्विकम्।
स्यात् शतृशानौ तिप्तेवत् क्रियायां च दशाक्षरम् ।। १०३ ।।

स्याद् विदेर्वा वसुश्चाऽथ मुगानेतः पदं त्रिकम्।
शीले तृन्निष्णुस्नुक्नुः षा-कोकणः पदमेककम् ।। १०४ ।।

यङ ऊकस्तथाऽलुक् च वाऽन्यत्र पुनरादृतः।
किर्द्विश्च भूते ञीतां तक् सदोणादय इत्यथ ।। १०५ ।।

भवेच्च तुम् तदर्थायां भविष्यति पदं त्रिकम्।
घञ् भावे आतः संज्ञाया-मकर्तरि च सप्तकम् ।। १०६ ।।

स्वरादेर्मदां मूर्तौ ध -नो ट्विततोऽथुर्ड्वितस्त्रिमक् ।
तत्कृते सप्त नट् की स्यात् क्तो नपुंसक इत्यपि ॥ १०७ ॥

युडित्येकपदं सूत्रं साधनाधारयोः पुनः ।
गत्यर्थादकर्मकात्क-र्तरि क्तो-भावकार्ययोः ॥ १०८ ॥

ईषद्दुःसुषु खल्यू च तव्यानीयौ ततः परम् ।
स्वराद्यः पुशकाचेचा-तस्त्र्यक्षरं पदं त्रिकम् ॥ १०९ ॥

(आर्या) ऋहसान्तात् ध्यणोरा-वश्यके फलेऽऋदुपधात् कयबेव ।
भवेत्तदनु स्त्रियां भावे क्तिः स्या-षिद्भिदामङेव हि ॥ ११० ॥

गुरोर्हसात् प्रत्ययान्तात् चजोः कगौ घिति त्रिकम् ।
ह्रस्वस्य पिति तुक् स्याच्च शिति चतुर्वदित्यथ ॥ १११ ॥

दशवर्णमोदौतोर्य - प्रत्ययः स्वरवत् पुनः ।
ढि ढो लोपो दीर्घश्च हसां चेरेकवर्णकम् ॥ ११२ ॥

द्विपदं युवोरनाकौ ततो रारो झसे ह्वशाम् ।
वै यजां यवराणां य्वृ-तः सम्प्रसारणं किति ॥ ११३ ॥

ग्रहां ङ्किति च णबादौ पूर्वस्याऽस्य पदद्वयम् ।
दो दत्तिश्च स्वरात्तो वा स्यात् स्थामी द्विपदं ह्यदः ॥ ११४ ॥

स्याद् दस्तस्य नो दश्चाऽथ रस्त्राणाद्यास्ततः परम् ।
ल्वाद्योदितस्तथेच्छार्थे-षु कर्तृकेषु तुम् ततः ॥ ११५ ॥

द्विपदं पूर्वकाले क्त्वा समासे कयप् पदं द्विकम् ।
पौन्यःपुन्ये णम् पदं द्वि-श्च तदव्ययमेव च ॥ ११६ ॥

स्यादव्यद्विभक्तेर्लुक् सूत्रं सप्ताक्षरात्मकम् ।
दूराह्वाने टेः प्लुतो विचार्या पदमेककम् ॥ ११७ ॥

लोकाच्छेषस्य सिद्धिः स्यात् कृत्सूत्राणि भवन्ति च ।
चतुर्णवतिसङ्ख्यानि बद्धानि पद्यमालया ॥ ११८ ॥

३१०
०७८
०९४
४८२ सारस्वत सूत्रसंख्या

संज्ञाप्रकरणं स्याच्च स्वरसन्धिस्ततः परम् ।
प्रकृतिभावसन्धिश्च व्यञ्जनाच्च विसर्गतः ॥ ११९ ॥

नामप्रकरणं स्याच्च ततोऽपि युष्मदस्मदोः ।
कारक तद्धितस्त्रीश्च समासाख्यातकृत्ततः ॥ १२० ॥

अनेनाऽनुक्रमेणैवा-पठेत् सूत्रं सरस्वती ।
ततः परमृजुश्चक्रे श्रीमद्भिरनुभूतिभिः ॥ १२१ ॥

विद्वच्चिन्तामणिग्रन्थः कण्ठपाठे पठन्ति ये ।
तेषां वक्त्रे नरीनर्ति सर्वदा श्रीसरस्वती ॥ १२२ ॥

श्रीविधिपक्षगच्छेशाः सूरिकल्याणसागराः ।
तेषां शिष्यैर्वराचार्यैः सूरिविनयसागरैः ॥ १२३ ॥

सारस्वतस्य सूत्राणां पद्यबन्धो विनिर्मितः ।
विद्वच्चिन्तामणिग्रन्थः कण्ठपाठस्य हेतवे ॥ १२४ ॥

पुष्पदन्तो मही गङ्गा यावन्मेरूर्महार्णवः ।
तावन्नन्दत्वयं ग्रन्थो गीःसूत्रामृतमध्यराट् ॥ १२५ ॥

सारस्वतस्य वक्तव्या-न्युदाहरणसंयुतैः ।
विनयसागराचार्य-रलेखिषत सत्वरम् ॥ १२६ ॥

## ॥ इति श्रीविद्वच्चिन्तामणिग्रन्थः समाप्तः ॥

संवत् १८७४ वर्षे शाके १७३९ प्रवर्तमाने फाल्गुनमासे
शुक्लपक्षे षष्ठीतिथौ शुक्रवासरे लिपीकृतम् ॥
श्री साडा ॐ अर्हः ॥
श्री शान्तिनाथप्रसादात् ॥ श्रीरस्तु ॥